## आमुखम्

संस्कृतपठनस्य आरम्भावसर इति सम्यक् ज्ञात्वा अत्र श्रवणस्य तथा भाषणस्य च प्राधान्यं दत्तमस्ति। पुनः संस्कृतोत्सवस्य सामान्यपरिचयमपि प्राप्तुम् अत्र अवसरः कल्पितोऽस्ति। भाषापठने सम्भाषणस्य प्राधान्यं सर्वविदितमेव। पाठेऽस्मिन् संस्कृतसम्भाषणस्य प्राथमिकान् अंशान् परिशीलयितुम् अवकाशोऽस्ति। आशयावगमने छात्राः यत्र क्लेशम् अनुभवन्ति, तत्र मातृभाषायाः उपयोगः कार्यः। पाठभागे यद्दत्तं तत् सर्वमपि तेनैव क्रमेण अनुवर्तनीयमिति नास्ति। उचिते सन्दर्भे युक्त्यनुसारं प्रवर्तनानि सञ्चालनीयानि। छात्राणां संस्कृतभाषाश्रवणाय यावच्छक्यम् अवसरो दातव्यः। पाठपुस्तकस्थानि तथा अन्यानि च पठनप्रवर्तनानि कक्ष्यायां छात्राणां रुच्यनुगुणं कार्यक्षमतया, सर्वेषां सहभागित्वेन यदि सञ्चालयन्ति तर्हि पाठोऽयं सरलतमो भवेत्।

**पाठस्य नाम - संस्कृतोत्सवः।**

**आशयः - संस्कृतोत्सवमधिकृत्य ज्ञानम्।**

**उद्देश्यम् - संस्कृतोत्सवे भागभागित्वम्।**

**नैपुणी - सम्भाषणसामर्थ्यम् ।**

**कालांशः - १४**

**अन्तर्जालघटकाः - संस्कृतोत्सवकार्यक्रमाणां सान्द्रमुद्रिकाः।**

| आशयाः / धारणाः / व्यवहाररूपाणि | पठनप्रवर्तनानि / पठनतन्त्राणि | पठनाधिगमाः |
|---|---|---|
| सम्भाषणवैभवप्राप्तिः, संस्कृतोत्सवमधिकृत्य ज्ञानम्। संस्कृतोत्सवः (सम्भाषणम्) | साभिनयं सम्भाषणम् अवतारयन्ति, सम्बोधनरूपाणि विविच्य लिखति, लकारानुसारं क्रियाविवेचनं,द्वितीयाविभक्ति ज्ञानम्। | आचारोपचारपदान्युपयुज्य सम्भाषणं कुर्वन्ति। द्वितीयाविभक्तिं विविच्य लिखन्ति। संस्कृतोत्सवम् अधिकृत्य जानन्ति। विवेचनञ्च कुर्वन्ति। |

**सिध्दताप्रवर्ततनम्।**

अध्यापिका प्रवेशनोत्सवस्य चित्रं स्वीकृत्य कक्ष्यां प्रविशति। अभिवादनादिकं कृत्वा चित्रं प्रदर्श्य चित्रे किं किम् अस्ति? इत्येवं पृच्छति। तदा छात्राः प्रादेशिकभाषया लघूनि वाक्यानि वदेयुः। तानि संस्कृतभाषया अनूद्य उच्चैः उक्त्वा श्यामफलके लिखित्वा प्रदर्शयति। यथा - 'प्रवेशनोत्सवस्य चित्रमिदम्। अत्र उद्घाटनसभा वर्तते। छात्राः उपविशन्ति। विद्यालयः अलंकृतो भवति।'

अध्यापिका अग्रे पृच्छति। 'विद्यालये अन्ये के के उत्सवाः आघुष्यन्ते? इति। छात्राणाम् उत्तराणि अध्यापिका श्यामफलके लिखति - यथा 'ओणाघोषः, क्रिस्तुमस्, विद्यालयकलोत्सवः इत्यादयः।

अन्ते विद्यालयीयान् उत्सवान् अध्यापिका एवं क्रोडीकरोति -

प्रवेशनोत्सवः, परिस्थित्युत्सवः, स्वतन्त्रतादिनोत्सवः, विद्यालयकलोत्सवः, संस्कृतोत्सवः, शिशुदिनोत्सवः, गणतन्त्रदिनोत्सवः, वार्षिकोत्सवः।

ततः अध्यापिका विद्यालयकलोत्सवसम्बद्धं संस्कृतोत्सवं छात्रान् परिचाय्य तदधिकृत्य एकं सम्भाषणं पश्याम इत्युक्त्वा पाठं प्रति छात्रान् आनयति।

**शिष्टाचारपरिचायनम्** - अध्यापिका कक्ष्यां प्रविश्य अभिवादनप्रत्यभिवादनं करोतु - यथा - 'नमस्ते छात्राः ,स्वागतम्, सुप्रभातम् , शुभदिनमस्तु सर्वेभ्यः' इति। ततः एतानि शिष्टाचारपदानि इति बोधयतु। अनन्तरम् एकं गीतं श्रावयतु श्यामफलके लिखतु च ।

गीतम् -

'सूर्याय सुस्वागतम्........सुस्वागतम्......
सूर्याय सुस्वागतम्।
सुप्रभातकारकाय।
तमोनिवारकाय
सूर्याय सुस्वागतम्।।
चन्द्राय शुभरात्रिः
चन्द्रिकाप्रदायकाय।
आनन्ददायकाय
चन्द्राय शुभरात्रिः।

ततः छात्राः गीतस्थानि, पाठभागस्थानि च शिष्टाचारपदानि चित्वा लिखन्तु। लिखितानि पदानि सङ्घेभ्यः परस्परं विनिमाय मूल्यनिर्णयं करोतु। अन्ते अध्यापिका शिष्टाचारपदानि क्रोडीकरोतु।

यथा -

सुस्वागतम्, शुभरात्रिः, सुप्रभातं, नमस्ते, नमो नमः, नमस्कारः, धन्यवादः, क्षम्यतां, कृपया, अस्तु, भवतु, चिन्तामास्तु, स्वस्त्यस्तु, मङ्गलानि भवन्तु

शुभयात्रा, शिवमस्तु, शिवास्ते सन्तु पन्थानः , पुनर्मिलामः, पुनर्दर्शनाय।

अन्यानि शिष्टाचारपदानि युक्त्यनुसारं सञ्चित्य ददातु।।

**सविशेषनिर्देशः -अध्यापिका संस्कृतोत्सवसम्बन्धानां सर्वासां प्रतियोगितानां नामानि चार्टपत्रे विलिख्य कक्ष्यायां स्थापयतु।**

**प्रवर्तनम् १ सम्भाषणस्य साभिनयम् अवतारणम्।**

**उद्देश्यम् - सम्भाषणपरिज्ञानम्।**

**प्रक्रिया**

अध्यापिका सस्वरं पाठभागं पठति। अङ्गुलीं विन्यस्य सश्रद्धं पाठभागस्य निरीक्षणाय छात्रान् निर्दिशति। ततः छात्रान् सङ्घान् करोति। सङ्घे पाठभागस्य चर्चां कृत्वा वाचनाय निर्दिशति। प्रत्येकं सङ्घस्य वाचनं श्रुत्वा स्खालित्यनिवारणं करोति अध्यापिका। ततः वैयक्तिकरीत्यापि पाठभागस्य वाचनाय निर्दिशतु। यथोचितं मूल्यानिर्णयञ्च करोतु।

**मूल्यनिर्णयसूचिकाः**

अक्षरस्फुटता।

आशयग्रहणम्।

अनुस्यूतता।

**समानपदचयनम्**

पाठभागस्य सङ्घे, वैयक्तिकरीत्या च वाचनानन्तरं प्रवर्तनमिदं सङ्घशः करोतु। अध्यापिका कानिचन पदानि दत्वा तेषां पदानां समानपदानि पाठभागात् चित्वा लेखनाय निर्दिशतु। कृतं प्रवर्तनं प्रतिसङ्घम् एकः अवतारयतु। प्रत्येकमपि अवतारणं श्यामफलके लिखतु। छात्राः स्वयं मूल्यनिर्णयं कुर्वन्तु। अध्यापिका अपि मूल्यनिर्णयं करोतु।

**मूल्यनिर्णयसूचिकाः**

आशयग्रहणम्।

अक्षरव्यक्तता।

सर्वेषां भागभागित्वम्।

उदा-

| पदानि | समानपदानि |
| --- | --- |
| नमस्कारः | नमो नमः |
| विज्ञप्तिः | विज्ञापनम् |
| अतिसमर्था | अतिनिपुणा |
| प्रतियोगिताः | स्पर्धाः |
| .............. | ................ |
| .............. | ................ |

अध्यापिका छात्रान् षडङ्गसङ्घान् करोतु। अनन्तरं प्रत्येकं छात्रस्य कृते एकैकं कथापात्रं कल्पयतु। सम्भाषणांशस्य कण्ठस्थीकरणाय आवश्यकः समयः दातव्यः। ततः सम्भाषणांशस्य वर्गे अवतारणाय अवसरं ददातु। अवतारणसमये आवश्यकं साहाय्यञ्च अध्यापिकया दातव्यम्। एकस्य सङ्घस्य अवतारणसमये इतरे सङ्घाः मूल्यनिर्णयं कुर्वन्तु। अध्यापिका अपि यथोचितं मूल्यनिर्णयं करोतु।

**मूल्यनिर्णयसुचिकाः**

उचितावतारणम्।

आशयव्यक्तता।

अक्षरस्फुटता।

सर्वेषां भागभागित्वम्।

सम्भाषणपाटवम्।

**प्रवर्तनम् २ सम्भाषणपूरणम्।**

**उद्देश्यम् - सम्भाषपूरणसामर्थ्यम्।**

**प्रक्रिया**

पाठभागस्थस्य सम्भाषणस्य साभिनयावतारणानन्तरं प्रवर्तनमिदं भवतु। इदमप्येकं सङ्घप्रवर्तनम्। पाठपुस्तकस्थस्य राधिकाविवेकयोः सम्भाषणस्य यथोचितपूरणाय छात्रान् निर्दिशतु। छात्राणां कृते चर्चायै समयः देयः। प्रतिसङ्घं गत्वा प्रवर्तनस्य निरीक्षणमपि करोतु ।

कृतस्य प्रवर्तनस्यावतारणं प्रतिसङ्घम् एकः करोतु। छात्रसङ्घैरुक्तान् सम्भाषणांशान् अध्यापिका श्यामफलके लिखतु। मूल्यनिर्णयाय छात्रेभ्यः अपि अवकाशो देयः। अनन्तरम् अध्यापिका यथोचितं मूल्यनिर्णयं करोतु।

**मूल्यनिर्णयसूचिकाः**

आशयग्रहणम्।

उचितं पूरणम्।

अक्षरव्यक्तता।

**प्रवर्तनम् - ३ - सम्बोधनरूपाणां चयनम्।**

**उद्देश्यम् - सम्बोधनरूपाणां प्रत्यभिज्ञानम्।**

**प्रक्रिया**

अध्यापिका कक्ष्यायां सर्वेषामपि छात्राणां नामानि पृच्छतु। छात्रैरुक्तानि नामानि श्यामफलके संस्कृतभाषया लिखतु। अनन्तरं सम्बोधनरूपपरिचायनाय प्रत्येकमपि छात्रं तेषां नामानि आहूय सम्भाषणं करोतु।

यथा -

हे कृष्ण! कः विशेषः?

हे लतिके ! कुशलं किम्?

हे रहिम् ! त्वं कुत्र पश्यसि?

हे मनो! अत्र पश्य।

सम्भाषणानन्तरं श्याफलके लिखितानां नाम्नां सम्बोधनरूपाणि लिखित्वा प्रदर्शयतु। अनन्तरं पाठपुस्तकस्थानां सम्बोधनरूपाणां पट्टिकां व्यक्तिशः पूरयित्वा अवतारणाय निर्दिशतु। उचितं मूल्यनिर्णयमपि करोतु।

**मूल्यनिर्णयसूचिकाः।**

आशयावगमनम्।

उचितं पूरणम्।

यथा -

| पदम् | सम्बोधनम् |
|---|---|
| रामः | हे राम! |
| राधिका | हे राधिके! |
| कृष्णः | हे कृष्ण! |
| मोहनः | हे मोहन |
| देविका | हे देविके |
| मल्लिका | हे मल्लिके |
| बालः | हे बाल |
| बालिका | हे बालिके |

**प्रवर्तनम् - ४ - पट्टिकाकरणम् ।**

**उद्देश्यम् - लोट्-लटोर्विवेचनम्।**

**प्रक्रिया**

प्रवर्तनमिदं सम्भाषणात्मकं भवतु। एकैकं छात्रं नाम्ना आहूय विभिन्नान् निर्देशान् ददातु। अनन्तरं तदधिकृत्य सर्वान् प्रश्नांश्च पृच्छतु।

यथा -

अध्यापिका - हे उमेश! आगच्छतु। (उमेशः आगच्छति)

आम्......उमेशः आगच्छति। उमेशः किं करोति? (साङ्ग्यम्)

छात्राः - उमेशः आगच्छति।

अध्यापिका - हे उमेश ! गच्छतु (उमेशः गच्छति)

आम्......उमेशः गच्छति। उमेशः किं करोति? (साङ्ग्यम्)

छात्राः - उमेशः गच्छति।

एवमेव अन्यानि क्रियापदानि उपयुज्य सम्भाषणमिदम् अनुवर्तताम्।

क्रियापदानि - पठतु, लिखतु, पिबतु, खादतु, वदतु, गायतु, हसतु, क्रीडतु, उत्तिष्ठतु, उपविशतु।

ततः लोट् दृढीकरणाय छात्राणां मध्ये प्रवर्तनमिदं क्रियताम्।

अध्यापकः छात्रमेकमाहूय पुरतो विन्यस्य तस्मै निर्देशान् ददातु इति छात्रान् निर्दिशतु।

तदा छात्राः पठितानि क्रियापदानि उपयुज्य निर्देशान् ददति। सः छात्रः निर्देशानुसारम् अभिनयं करोतु।

यथा -

छात्राः - हे राम! गच्छतु (रामः गच्छति)।

एकः - हे राम! आगच्छतु (रामः आगच्छति)।

अपरः - हे राम! उपविशतु (रामः आसन्दे उपविशति)।

अन्यः - हे राम! पठतु (रामः पठति)।

एवं द्वित्राणां क्रियापदानां प्रयोगानन्तरम् अभिनयाय छात्रान्तरं निर्दिशतु। समयानुसारं सर्वेषां छात्राणाम् अवसरः देयः। ततः पाठपुस्तकस्थां पट्टिकां पूरयन्तु छात्राः। अध्यापिका यथोचितं मूल्यनिर्णयं करोतु। आदर्शपूरणं प्रदर्शयतु।

**मूल्यनिर्णयसूचिकाः।**

उचितं पूरणम्।

लकारज्ञानम्।

आशयबोधः।

यथा -

| लट् | लोट् |
|---|---|
| प्रविशति | प्रविशतु |
| योजयति | योजयतु |
| भवति | भवतु |
| नृत्यति | नृत्यतु |
| गायति | गायतु |
| यच्छति | यच्छतु |
| वदति | वदतु |
| लिखति | लिखतु |
| पठति | पठतु |

**प्रवर्तनम् - ५ - प्रश्नानाम् उत्तरलेखनम्।**

**उद्देश्यम् - द्वितायाविभक्तिपरिज्ञानम्।**

**प्रक्रिया**

अध्यापिका बहूनि वस्तूनि आदाय कक्ष्यां प्रविशति। तानि वस्तूनि अकारान्तपुंलिङ्ग-आकारान्त-ईकारान्तस्त्रीलिङ्ग-अकारान्तनपुंसकलिङ्गक्रमेण उत्पीठिकायां स्थापयतु। यथा -

| प्रथमगणः | द्वितीयगणः | तृतीयगणः | चतुर्थगणः |
|---|---|---|---|
| सुधाखण्डः | मापिका | लेखनी | पुस्तकम् |
| दण्डः | पेटिका | कूपी | धनम् |
| चषकः | पत्रिका | मार्जनी | उपनेत्रम् |

अनेनैव क्रमेण श्यामफलके लिखतु। तदा प्रत्येकं पदानां द्वितीयाविभक्तिरूपलेखनाय अपि श्यामफलके स्थानं संरक्षतु। अनन्तरम् एकैकं वस्तु उन्नीय तस्य नाम सस्वरं वदतु, छात्राः अनुवदन्तु च। ततः अध्यापिका एकैकं छात्रमाहूय प्रथमगणात् कस्यापि वस्तुनः स्वीकरणाय निर्दिशतु। स्वीकरणसमये अध्यापिका तां प्रक्रियां सूचयत्येवम् - 'रमेशः सुधाखण्डं स्वीकरोति' इति। ततः छात्रान् पृच्छतु 'रमेशः किं करोति ?' इति। तदा छात्राः 'रमेशः सुधाखण्डं स्वीकरोति 'इति उत्तरं ददति । सममेव द्वितीयाविभक्तिरूपं श्यामफलके उचितस्थाने लिखित्वा प्रदर्शयतु च। एवं गणान्तरानपि उपयुज्य द्वितीयाविभक्तिं परिचाययतु।

| प्रथमा | द्वितीया | प्रथमा | द्वितीया | प्रथमा | द्वितीया | प्रथमा | द्वितीया |
|---|---|---|---|---|---|---|---|
| सुधाखण्डः | सुधाखण्डम् | मापिका | मापिकाम् | लेखनी | लेखनीम् | पुस्तकम् | पुस्तकम् |
| दण्डः | दण्डम् | पेटिका | पेटिकाम् | कूपी | कूपीम् | धनम् | धनम् |
| चषकः | चषकम् | पत्रिका | पत्रिकाम् | मार्जनी | मार्जनीम् | उपनेत्रम् | उपनेत्रम् |

ततो पाठपुस्तकस्थानां प्रश्नानाम् उत्तरलेखनाय छात्रान् निर्दिशतु। लेखनानन्तरं प्रतिसंघं प्रश्नान् पृष्ट्वा छात्रैः कृतस्य प्रवर्तनस्य मूल्यनिर्णयमपि करोतु। प्रश्नानाम् उत्तराणि श्यामफलके लिखित्वा प्रदर्शयतु ।

यथा-

बालकः पुस्तकं पठति।

बालिका विद्यालयं गच्छति।

मातामही कथां वदति।

पुरुषः घटीं पश्यति।

(अत्र द्वितीयाविभक्त्यन्तं पदं भिन्नवर्णेन सुधाखण्डेन लिखतु)

**प्रवर्तनम् - ६ वाक्यपूरणम्।**

**उद्देश्यम् -द्वितीयाविभक्तेः दृढीकरणम्।**

**प्रक्रिया**

इदं वैयक्तिकं प्रवर्तनम्। अध्यापिका प्रथमाद्वितीयाविभक्त्योः पदानाम् अभ्यासं कारयित्वा पाठपुस्तकस्थं वाक्यं पठतु। छात्राः अन्यानि वाक्यानि यथोचितं पूरयित्वा अवतारयन्तु। अध्यापिका स्खालित्यानि परिहार्य तानि श्यामफलके प्रदर्शयतु च।

उचितरीत्या मूल्यनिर्णयमपि करोतु।

**मूल्यनिर्णयसूचिकाः।**

सर्वेषां भागभागित्वम्।

उचितप्रयोग।

अर्थग्रहणम्।

यथा -

माता बालिकां वदति।

चालकः यानं चालयति।

भक्तः देवालयं गच्छति।

**प्रवर्तनम् - ७ - वासराणां वाचनम्।**

**उद्देश्यम् - वासराणां परिचायनम्।**

**प्रक्रिया**

एकां दिनदर्शिकां स्वीकृत्य अध्यापिका कक्ष्यां प्रविशतु। ततः छात्रान् एवम् पृच्छतु

- 'एषा का? इति। तदा छात्राः तन्नाम आङ्गलभाषया वदेयुः। तदा अः छात्राः वासराणां नामानि वदन्तु, (मातृभाषया आङ्गलभाषया वा छात्राः वासराणि वदेयुः)। अनन्तरं तैरुक्तानि श्यामफलके लिखित्वा तस्य समानानि संस्कृतनामानि अपि लिखित्वा बहुवारं वाचयतु।

यथा -

| **आङ्गलभाषायाम्** | **संस्कृतभाषायाम्** |
|---|---|
| Sunday | रविवासरः। |
| Monday | सोममवासरः। |
| Tuesday | मङ्गलवासरः। |
| Wednesday | बुधवासरः। |
| Thursday | गुरुवासरः। |
| Friday | शुक्रवासरः। |
| Saturday | शनिवासरः। |

**प्रवर्तनम् - पूरणम्।**

**उद्देश्यम् - वासरज्ञानं दृढीकरणम्।**

वासरपाठनानन्तरं अभिनयपुरस्सरं सम्भाषणमेकम् अवतारयतु

यथा -

अध्यापिका - **अद्य** कः वासरः ?

छात्राः - **अद्य** बुधवासरः।

अध्यापिका-आम्, साधु। **अद्य** बुधवासरः। तर्हि **श्वः** कः वासरः?

(साभिनयावतारणे श्रद्धा देया)

छात्रा-**श्वः** गुरुवासरः ।

अध्यापिका -उत्तमम्। तर्हि **ह्यः** कः वासरः ?

छात्रा -**ह्यः** मङ्गलवासरः।

.......................................

.......................................

एवं वासरपाठनं साभिनयं भवतु। ततः पाठभागस्थायाः पट्टिकायाः पूरणाय छात्रान्

निर्दिशतु। वैय्यक्तिकं पूरणं भवतु। पूरितम् उत्तरं छात्राः अवतारयन्तु। स्खालित्यानि परिहृत्य उचितं रुपं लिखित्वा प्रदर्शयतु।

**मूल्यनिर्णयसूचिकाः** -

वासराणां पठनम्।

सर्वेषां भागभागित्वम्।

उचितरीत्या पूरणम्।

यथा

| **परह्यः** | **ह्यः** | **अद्य** | **श्वः** | **परश्वः** |
|---|---|---|---|---|
| सोमवासरः | मङ्गलवासरः | बुधवासरः | गुरुवासरः | शुक्रवासरः |

●